वा एवं तद्विपरीतमसम्यगदर्शनमप्यस्ति वा नास्ति वेति प्रलपन्मत्तोन्मत्तपक्षस्यैव स्यान्न प्रत्याययितरूपपक्षस्य। स्वर्गापवर्गयोश्च पक्षे भावः पक्षेचाभावः तथा पक्षे नित्यता तथा पक्षेचानित्यता इत्यनवधारणायां प्रवृत्त्यनुपपत्तिः। अनादिसिद्धजीवप्रवृत्तीनाञ्च स्वशास्त्रावधृतभावानामयथावधृतस्वभावत्वप्रसङ्गः। एवं जीवादिषु पदार्थेष्वेकस्मिन् धर्मिणि सत्त्वासत्त्वयोर्विरुद्धयोरसम्भवात् सत्त्वे चैकस्मिन् धर्मेऽसत्त्वस्य धर्मान्तरस्यासम्भवादसत्त्वे चैवं सत्त्वस्यासम्भवाद सङ्गतमिदमार्हतं मतम्। एतेनैकानेकनित्यव्यतिरिक्ताव्यतिरिक्ताद्यनेकान्ताभ्युपगमानिराकृतामन्तव्याः। यत्तु पुद्गलसंज्ञकेभ्योऽणुभ्यः सङ्घाताः सम्भवन्तीति कल्पयन्ति तत् पूर्व्वेणैवाणुवादनिराकरणेन निराकृतम्भवतीत्यतोन पृथङ्निराकरणाय प्रयत्यते"। अस्तिनास्तिकायादयोऽप्युन्नेयाः। अणुवादनिराकरणञ्चारम्भवादशब्दे दृश्यम्।

**अस्तिक्षीरा** स्त्री अस्ति क्षीरं यस्याः। बहुदुग्धवत्यां स्त्रीगव्यादौ।

**अस्तित्व** न० अस्ति भावः त्व। विद्यमानत्वे। "न हि देहान्तरसम्बन्धिन आत्मनः प्रत्यक्षेणास्तित्वज्ञाने लौकायतिकाः बौद्धाश्च प्रतिकूलाः स्युः नास्त्यात्मेति" छ० उ० भा०। "सर्व्वोह्यात्मास्तित्वं प्रत्येति न नाहमस्मीति" शा०भा०। तल्। अस्तिताप्यत्र स्त्री।"गौरस्तितावान् अस्तिपदसमभिव्याहृतगौःपदस्मारितत्वात्" शब्दश०। [स्त्रियां ङीप्।

**अस्तिमत्** त्रि० अस्ति विद्यमानं धनमस्य मतुप्। धनिनि

**अस्तु** अव्य० अस–दीप्तौ तुन्। १अनुज्ञायां, २पीड़ायाम् ३प्रतिक्षेपे ४असूयायाम्, ५प्रकर्षे, ६अङ्गीकारे, ७प्रशंसायाम्, ८लक्षणे, ९असूयापूर्वकाङ्गीकारे च। "अस्तोश्चेति वक्तव्यम्" वार्त्ति० स्म्। अस्तुङ्कारः अभ्युपगमः।

**अस्तेन** त्रि० न०त०। चोरभिन्ने।

**अस्तेय** न० अभावे न०त०। १स्तेयाभावे। "लोभस्य पुरतः कोऽमी सत्यास्तेयापरिग्रहाः" प्रबोधच०। "अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहायमाः" पात०सू० उक्ते २यमभेदे च "बलाद्रहसि वा परवित्ताहरणं स्तेयं तदभावोऽस्तेयम्" वृत्तिः। तादृशयमानुष्ठानेऽवान्तरफलमपि तत्र दर्शितम्। "अस्तेयप्रतिष्ठायां सर्व्वरत्नोपस्थानम्" पात०सू०। दिव्यरत्नानां स्वयमागत्यनिकटे उपस्थितिरित्यर्थः।

**अस्तोभ** त्रि० नास्ति स्तोभः हुंफड़ादिः निरर्थकः शब्दोयत्र निरर्थकशब्दशून्ये "अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः" विवरणं स्तोभशब्दे। [पाठान्तरम्।

**अस्त्य** न० अस्ति विद्यमानतायै हितम् यत्। छन्दे निरुक्ते

**अस्त्यान** न० स्त्यै–क्त भावे न०त०। १निन्दायाम्, २सत्ते ने च। कर्त्तरि क्त स्त्यानः संहत न०त०। तद्भिन्ने त्रि०।

**अस्त्र** न० अस्यते क्षिप्यते अस–ष्ट्रन्। १ क्षेप्यास्त्रे शरादौ करणे ष्ट्रन्। २चापे, धनुषि ३रिपुक्षेपणसाधने प्रहरणमात्रे खड्गादावपि। "प्रयुक्तमप्यस्त्रमितो वृथा स्यात्" "प्रत्याहृतास्त्रो गिरिशप्रभावात्"। "अतिप्रबन्धप्रहितास्त्रवृष्टिभिः" इति च रघुः। "अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणः" वेणी०। [कारत्वात्तथात्वम्।

**अस्त्रकण्टक** पु० अस्त्रं कण्टकइव। वाणे तस्याग्रस्य कण्टका-

**अस्त्रकार** त्रि० अस्त्रं करोति निर्म्मिमीते क्ट –अण् उप० स०। शस्त्रनिर्म्माणकारके। ण्वुल्। अस्त्रकारकोऽप्यत्र।

**अस्त्रचिकित्सा** स्त्री अस्त्रेण चिकित्सा। सुश्रुतोक्ते अस्त्रेण चिकित्साभेदे सा च यथा। "अस्मिन् शास्त्रे शस्त्रकर्म्मप्राधान्याच्छस्त्रकर्म्मैव तावत् पूर्व्वमुपदेक्ष्यामस्तत्सम्भारांश्च॥ तच्च शस्त्रकर्म्माऽष्टविधम्। तद्यथा। छेद्यं भेद्यं लेख्यं वेध्यमेष्यमाहार्य्यं विस्राव्यं सीव्यमिति॥ अतोऽन्यतमं कर्म्म चिकीर्षता वैद्येन पूर्व्वमेवोपकल्पयितव्यानि तद्यथा यन्त्रशस्त्रक्षाराग्निशलाकाशृङ्गजलौकालाबूजाम्बवौष्ठपिचुप्रोतसूत्रपत्रपट्टमधुघृतवसापयस्तैलतर्पणकषायालेपनकल्कव्यजनशीतोष्णोदककटाहादीनि परिकर्म्मिणस्तु स्निग्धाः स्थिरा बलवन्तः॥ ततः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु दध्यक्षतान्नपानरत्नैरग्निं विप्रान् भिषजश्चार्च्चयित्वा कृतबलिमङ्गलस्वस्तिवाचनं लघु भुक्तवन्तं प्राङ्मुखमातुरमुपवेश्य यन्त्रयित्वा प्रत्यङ्मुखो वैद्यो मर्म्मसिरास्नायुसन्ध्यस्थिधमनीः परिहरन्ननुलोमं शस्त्रं निदध्यादापूयदर्शनात् सकृदेवापहरेच्छस्त्रमाशु च। महत्स्वपि च पाकेषु द्व्यङ्गुलं त्र्यङ्गुलं वा शस्त्रपदमुक्तं तत्रायतो विशालः समः सुविभक्त इति व्रणगुणाः भवतस्तत्र॥ आयतस्तु विशालस्तु सुविभक्तो निराश्रयः। प्राप्तकालकृतश्चापि व्रणः कर्म्मणि शस्यते॥ शौर्य्यमाशुक्रिया शस्त्रतैक्ष्ण्यमस्वेदवेपथू। असंमोहश्च वैद्यस्य शस्त्रकर्म्मणि शस्यते॥ एकेन वा व्रणेनाशुध्यमानेनान्तराबुद्ध्यावेक्ष्यापरान् व्रणान् कुर्य्यात्। भवति चात्र॥ यतो यतो गतिं विद्यादुत्सङ्गो यत्र यत्र च। तत्र तत्र व्रणं कुर्य्याद्यथा दोषो न तिष्ठति॥ तत्र भ्रूगण्डशङ्खललाटाक्षिपुटौष्ठदन्तवेष्टककक्षाकुक्षिवङ्क्षणेषु तिर्य्यक्छेद उक्तः। चन्द्रमण्डलवच्छेदान् पाणिपादेषु कारयेत्। अर्द्धचन्द्राकृतींश्चापि गुदे मेढ्रे च बुद्धिमान्॥ अन्यथा